अस्मिन् प्रश्नपत्रे 51 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति।

अनुक्रमाङ्कः | | | | | | | | | | | | |

गूढसंख्या 71/S/246/A

स्तबकः – A

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246-S)

परीक्षादिवसः दिनाङ्कश्च ____________________

निरीक्षकयोः हस्ताक्षरम् 1. ____________________

2. ____________________

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**सामान्या निर्देशाः :**

1. सर्वेषां प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु।
2. प्रश्नपत्रिकां पठितुं **15** निमेशाः दत्ताः। प्रश्नपत्रिका **02.15** मध्यह्ने समये दीयते। **02.15** समयतः **02.30** समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न किमपि उत्तरं लिखेयुः।
3. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
4. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
5. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
6. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
7. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
8. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या **71/S/246/A**, स्तबक–A नूनं लेख्या।
9. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।



UNNATI EDUCATION
9899-436-384: 9654-279-279

# SANSKRIT VYAKARAN

# संस्कृतव्याकरणम्

# (246-S)

**परीक्षासमयावधिः – होरात्रयम्]** **[पूर्णाङ्काः : 100**

**निर्देशाः (i)** अस्मिन् प्रश्नपत्रे **[A]** भागे **20**, **[B]** भागे **15**, **[C]** भागे **6**, **[D]** भागे **6**, **[E]** भागे **4** इति आहत्य **51** प्रश्नाः सन्ति।

**(ii)** **सर्वे** प्रश्नाः **अनिवार्याः**।

**(iii)** प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति अङ्काः दीयन्ते।

**(iv)** **[A]** भागे प्र.सं. **1** तः **20** पर्यन्तं – बहुविकल्पप्रकारस्य प्रश्नाः **(MCQs)** येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु।

**(v)** **[B]** भागे प्र.सं. **21** तः **35** पर्यन्तम् वस्तुनिष्ठप्रश्नाः मेलनम्, रिक्तस्थानानि, सत्यम्–असत्यम् इत्यादिः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति।ते यथानिर्देशं समाधेयाः।

**(vi)** **[C]** भागे प्र.सं. **36** तः **41** पर्यन्तम् अतिलघूत्तरीयाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं **30** तः **50** शब्दानां परिधिमध्ये समाधेयाः।

**(vii)** **[D]** भागे प्र.सं. **42** तः **47** पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं **50** तः **80** शब्दानां परिधिमध्ये समाधेयाः।

**(viii)** **[E]** भागे प्र.सं. **48** तः **51** पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं **80** तः **100** शब्दानां परिधिमध्ये समाधेयाः।

**(ix)** समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

**(x)** स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।

**(xi)** उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् तथा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

**(xii)** समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

**(xiii)** निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

**(xiv)** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेखनीयः।



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

[A] प्रश्नसङ्ख्या 1-20 बहुविकल्पप्रश्नाः सन्ति येषां कृते 20 अङ्काः आवंटिताः सन्ति। 1×20=20

1 टवर्गस्य उच्चारणस्थानं किम्? 1

(क) कण्ठः (ख) दन्ताः

(ग) तालु (घ) मूर्धा

2 अ, ए, ओ – इत्येतेषां वर्णानां का संज्ञा भवति? 1

(क) वृद्धिः (ख) गुणः

(ग) गुरु (घ) संहिता

3 ङित् आदेशः कस्य स्थाने भवति? 1

(क) आदेरलः स्थाने (ख) अन्त्यस्यालः स्थाने

(ग) पदस्यादेरलः स्थाने (घ) सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने

4 'कर्कन्धुः' – अत्र किं सन्धिकार्यम्? 1

(क) पूर्वरूपम् (ख) सवर्णदीर्घः

(ग) पररूपम् (घ) गुणैकादेशः

5 'विश्नः' अत्र तवर्गस्य स्थाने चवर्गादेशनिषेधः केन सूत्रेण भवति? 1

(क) तोः षि (ख) स्तोः श्चुना श्चुः

(ग) खरि च (घ) शात्

6 'हे गौरि' – अत्र ह्रस्वत्वं केन सूत्रेण भवति? 1

(क) अम्बार्थनद्योर्ह्रस्वः (ख) एकवचनं सम्बुद्धिः

(ग) आङि चापः (घ) बहुवचने झल्येत्

7 'नपुंसकाच्च 7.1.19' – इत्यनेन सूत्रेण किम् विधीयते? 1

(क) शि आदेशः (ख) अडागमः

(ग) शी आदेशः (घ) नुमागमः

8 'अनड्वन्' – अत्र अम् आगमः केन सूत्रेण विधीयते? 1

(क) अम् सम्बुद्धौ (ख) अतोऽम्

(ग) अमि पूर्वः (घ) अतो गुणे

9 स्त्रीलिङ्गे द्वितीयैकवचने <u>इदम्</u> – शब्दस्य किं रूपम्? 1

(क) अयम् (ख) इमम्

(ग) इयम् (घ) इदम्

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR



UNNATI EDUCATION
9899-436-384: 9654-279-279

10 'मह्यम्' इत्यत्र कः प्रत्ययः ? 1

(क) ङे (ख) भ्यम्

(ग) ङस् (घ) सु

11 'विद्वस्' – शब्दस्य द्वितीया बहुवचने किं रूपम् ? 1

(क) विदुषे (ख) विदुसः

(ग) विदुषी (घ) विदुषः

12 'रमा+ङि' – इत्यवस्थायां आम् आदेशः केन सूत्रेण विधीयते ? 1

(क) ह्रस्वं च (ख) अम्बार्थनद्योर्ह्रस्वः

(ग) ङेराम्नद्याम्नीभ्यः (घ) ह्रस्वस्य गुणः

13 अधस्तनेषु कस्य अदर्शनं लुक्श्लुलुप्संज्ञकं भवति ? 1

(क) आगमस्य (ख) धातोः

(ग) आदेशस्य (घ) प्रत्ययस्य

14 'अनडुह्' शब्दस्य सौ कः आगमो भवति ? 1

(क) आम् (ख) नुम्

(ग) अम् (घ) मुम्

15 '**शिवाय** बिल्वपत्रं रोचते' – अस्मिन् वाक्ये रेखाङ्कितपदस्य सम्प्रदानसञ्ज्ञा केन सूत्रेण भवति ? 1

(क) स्पृहेरीप्सितः (ख) कर्मणा यमभिप्रैति स सम्प्रदानम्

(ग) रुच्यर्थानां प्रीयमाणः (घ) चतुर्थी सम्प्रदाने

16 जायमानस्य या प्रकृतिः (उपादानकारणं) तत् कारकं किं संज्ञं स्यात् ? 1

(क) सम्प्रदानम् (ख) करणम्

(ग) अपादानम् (घ) अधिकरणम्

17 'शतृ–शानच्' इत्यनयोः प्रत्यययोः का सञ्ज्ञा ? 1

(क) सत् (ख) घि

(ग) घु (घ) निष्ठा

18 'आशंसु' अत्र कः प्रत्ययः ? 1

(क) उ (ख) उन्

(ग) उञ् (घ) उक्



UNNATI EDUCATION
9899-436-384: 9654-279-279

19 अधस्तनेषु स्त्रियां भावे कः प्रत्ययः ? 1

(क) क्तवतु (ख) तृच्

(ग) अनीयर् (घ) क्तिन्

20 'अ प्रत्ययात्' इत्यनेन विहितः 'अ' प्रत्ययः कस्मिन् लिङ्गे ? 1

(क) पुल्लिङ्गे (ख) नपुंसकलिङ्गे

(ग) स्त्रीलिङ्गे (घ) त्रिषु लिङ्गेषु

**[B]** प्रश्नसङ्ख्या **21-35** वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नः द्वयोः अङ्कयोः भवति, तदर्थं **30** अङ्काः आवंटिताः भवन्ति। **2×15=30**

21 अधोलिखितयोः रिक्तस्थानयोः पूर्त्तिः करणीया। 2

(क) ................ उच्चारणस्थानम् दन्तौष्ठम् अस्ति।

(ख) ................ मावसानाः स्पर्शाः।

22 उचितकथनस्य समक्षं 'सत्यम्' अनुचितकथनस्य समक्षम् 'असत्यम्' इति लिखत। 2

(क) प्रादयः क्रियायोगे उपसर्गसञ्ज्ञकाः न भवन्ति। (सत्यम् / असत्यम्)

(ख) अज्भिरव्यवहिताः हलः संयोगसञ्ज्ञाः स्युः। (सत्यम् / असत्यम्)

23 यथायोग्यं मेलयत। 2

| | |
|---|---|
| (क) यथासंख्यमनुदेशः | (1) अन्तरतमः |
| (ख) विप्रतिषेधः | (2) समानाम् |
| | (3) तुल्यबलविरोधः |

24 रिक्तस्थानयोः पूर्तिः करणीया। 2

(क) स्पर्शानाम् आभ्यन्तरप्रयत्नम् ................ अस्ति।

(ख) तः परः यस्मात् सः ...............।

25 रिक्तस्थानयोः पूर्तिः करणीया। 2

(क) ................ प्रत्ययस्य अपृक्तसञ्ज्ञा भवति।

(ख) अद्रव्यार्थाः प्रादयः ............... सञ्ज्ञाः स्युः।

26 उचितकथनस्य समक्षं 'सत्यम्' अनुचितकथनस्य समक्षम् 'असत्यम्' इति लिखत। 2

(क) 'कृष्णर्द्धिः' इत्यत्र 'आद् गुणः' इत्यनेन पूर्वपरयोः वृद्धिरेकादेशो भवति। (सत्यम् / असत्यम्)

(ख) 'श्रीशः' इत्यत्र 'अकः सवर्णे दीर्घः' इत्यनेन पूर्वपरयोः दीर्घ एकादेशो भवति। (सत्यम् / असत्यम्)



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
UNNATI EDUCATION
9899-436-384: 9654-279-279

**27** यथायोग्यं मेलयत। **2**

(क) वा शरि — (1) तवर्गस्य चवर्गनिषेधः

(ख) शात् — (2) विसर्गस्य विकल्पेन विसर्गः

(3) रुत्वम्

**28** यथायोग्यं मेलयत। **2**

(क) शिवोऽर्च्यः — (1) यलोपः

(ख) भगो नमस्ते — (2) यणादेशः

(3) रु इत्यस्य उत्वम्

**29** रिक्तस्थानयोः पूर्तिः करणीया। **2**

(क) 'रमा+औ' इत्यत्र ................ सूत्रेण शी आदेशः भवति।

(ख) मतिशब्दस्य चतुर्थी एकवचने नदीसञ्ज्ञायां ............... रूपम्।

**30** रिक्तस्थानयोः पूर्तिः करणीया। **2**

(क) 'वारि+अम्' इत्यत्र ................ सूत्रेण अम् प्रत्ययस्य लुक् भवति।

(ख) दधिशब्दस्य तृतीयैकवचने ............... रूपम्।

**31** उचितकथनस्य समक्षं 'सत्यम्' अनुचितकथनस्य समक्षम् 'असत्यम्' इति लिखत। **2**

(क) अनुक्ते करणे प्रथमा भवति। (सत्यम् / असत्यम्)

(ख) 'रुच्यर्थानां प्रीयमाणः' अनेन सूत्रेण करणसञ्ज्ञा भवति। (सत्यम् / असत्यम्)

**32** उचितकथनस्य समक्षं 'सत्यम्' अनुचितकथनस्य समक्षम् 'असत्यम्' इति लिखत। **2**

(क) 'माता बालं सर्पात् रक्षति' अत्र भयहेतुः सर्पः। (सत्यम् / असत्यम्)

(ख) 'आख्यातोपयोगे' अनेन सूत्रेण अपादानसंज्ञा विधीयते। (सत्यम् / असत्यम्)

**33** रिक्तस्थानयोः पूर्तिः करणीया। **2**

(क) 'इत्थम्भूतलक्षणे' इति सूत्रेण ................ विभक्तिः विधीयते।

(ख) 'नेत्रेण काणः' अत्र ................ सूत्रेण तृतीयाविभक्तिः।

**34** प्रदत्तशब्दे समुचितविभक्तिं संयोज्य रिक्तस्थानयोः पूर्तिः करणीया। **2**

(क) ................ उपरि। (ग्राम)

(ख) कुशलः ................। (हरिपूजन)

**35** यथायोग्यं मेलयत। **2**

(क) <u>कर्ता</u> कटान् — (1) तृच्

(ख) जगन्वान् — (2) कानच्

(3) क्वसु



UNNATI EDUCATION
9899-436-384: 9654-279-279

**[C]** षट्–प्रश्नानाम् यथानिर्देशं अतिलघूनि उत्तराणि लिखत। **2×6=12**

**36** ओष्ठ्यवर्णाः के?

**अथवा**

'परेणैवेण्ग्रहाः सर्वे' पंक्तेः आशयं लिखत।

**37** 'भूवादयो धातवः' सूत्रस्यार्थः कः?

**अथवा**

अवसानसंज्ञा कस्य?

**38** 'सर्वस्यै' अत्र स्याडागमविधायकं सूत्रं किम्? कश्च तस्य अर्थः?

**39** 'वारिषु' अत्र षत्वं केन सूत्रेण भवति?

**40** 'वाह ऊठ्' इति सूत्रस्य उदाहरणं विलिख्य सूत्रकार्यं प्रदर्शयत्।

**अथवा**

'चतुर्णाम्' इत्यत्र नस्य णत्वं केन सूत्रेण भवति?

**41** 'छात्रः लेखन्या प्रबन्धं लिखति' ससूत्रं विभक्तिं प्रदर्शयत।

UNNATI
EDUCATIONS
EK KADAM UNNATI KI AUR

**[D]** षट्–प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त। **3×6=18**

**42** 'शेषो ध्यसखि' इति सूत्रं व्याख्यात।

**अथवा**

अव्ययसंज्ञाविधायकं सूत्रं व्याख्यात।

**43** 'उरण् रपरः' इति सूत्रं सोदाहरणं व्याख्यात।

**अथवा**

'आद् गुणः' इति सूत्रं सोदाहरणं व्याख्यात्।

**44** अस्य ससूत्रं सिद्धिः कार्या – वाग्घरिः।



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

45 'वसुस्रंसुध्वंस्वनडुहां दः' इति सूत्रं सोदाहरणं व्याख्यात।

**अथवा**

सुदिव् शब्दस्य प्रथमैकवचने किं रूपम्? ससूत्रं साधयत।

46 'शस्त्रम्' अत्र प्रत्ययविधायकं किं सूत्रम्? अस्य पदस्य सिद्धिः कार्या।

47 'कालसमयवेलासु तुमुन्' – इति सूत्रस्य उदाहरणानि प्रदर्श्य सिद्धिः कार्या।

[E] चत्वारः प्रश्नाः दीर्घोत्तरैः समाधेयाः। 5×4=20

48 'आदेः परस्य' इत्यस्याः परिभाषायाः व्याख्या कार्या।

**अथवा**

'विप्रतिषेधे परं कार्यम्' अस्य सूत्रस्य व्याख्या कार्या।

49 'तदोः सः सावनन्त्ययोः' इति 'युवावौ द्विवचने' इति **वा** सूत्रं सोदाहरणं व्याख्यात।

50 'उभयप्राप्तौ कर्मणि' इति सूत्रं विशदं व्याख्यात।

51 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्रम् उदाहरणोल्लेखपुरस्सरं व्याख्यात।

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR



UNNATI EDUCATION
9899-436-384: 9654-279-279